**दिनाङ्क:-05/10/2023** **प्रात : 06:55**

**प्रधानमन्त्री/राज्यद्वययात्रा**

प्रधानमन्त्री अद्य राजस्थाने स्वास्थ्याधारभूत-संरचनां सुदृढं कर्तुं महत्वपूर्ण-परियोजनानाम् आधारशिलां संस्थापयिष्यति । एतासु परियोजनासु जोधपुरस्य अखिल-भारतीयायुर्विज्ञान-संस्थाने पञ्चाशदुत्तर-त्रिशत- शय्यानां ट्रॉमा-सेंटर इत्येतम् आघात-केन्द्रं, सम्पूर्ण-राज्ये प्रधानमन्त्री-आयुष्मान्-भारत-स्वास्थ्याधारभूत-संरचनाभियानस्य अभियानान्तर्गतं सप्त निरीक्षण-केन्द्रैः युताः परियोजनाः च सम्मिलिताः सन्ति । श्रीमोदी जोधपुर-विमान-स्थात्रे अत्याधुनिकस्य नूतन-स्थानक-भवनस्य शिलान्यासं करिष्यति। एतत् भवनं न्यूनातिन्यूनं चतुर्विंशति-सहस्र-वर्ग-मीटर-मिते क्षेत्रे अशात्यधिक-चतुश्शत-कोटि-रूप्यकाणां व्ययेन निर्मास्यते। एतस्मात् नवीन- स्थानक-भवनात् व्यस्त-समयावधौ पञ्चशतोत्तर-द्विसहस्र-यात्रिणः यात्रासेवायाः लाभं प्राप्स्यन्ति, अपि च अनेन क्षेत्रस्य पर्यटने अपि वृद्धिः भविष्यति ।

प्रधानमन्त्री आईआईटी-जोधपुर-परिसरस्य अपि लोकार्पणं करिष्यति । अस्य निर्माणे पञ्चत्रिंशदधिकैक-शताधिकैक-सहस्र-कोटि-रूप्यकाणां व्ययः जातः अस्ति । राजस्थानस्य केन्द्रीय-विश्वविद्यालये आधारभूत-संरचना-विकासस्य अन्तर्गतं उन्नत-प्रयोगशालायाः, कर्मचारि-आवास-क्रीडा-योग-विज्ञानकेन्द्रस्य च उद्घाटनं करिष्यति। श्री-मोदी विश्वविद्यालये केन्द्रीय-पुस्तकालयस्य छात्रावास-भवनस्य चापि शिलान्यासं करिष्यति । प्रधानमन्त्री प्रायः पञ्चसप्तत्यधिक-चतुश्शताधिकैक-सहस्र-कोटि-रूप्यकाणां विभिन्न-मार्ग-परियोजनानां अपि शुभारम्भं करिष्यति । अनेन संपर्क-सौविध्यं विवर्ध्य व्यापार-जीविकयोः सर्जने वृद्धिः भविष्यति। राजस्थानस्य यात्रावधौ श्रीमोदी द्वयोः नूतन-रेलयानयोः ध्वजमुत्थाप्य शुभारम्भं करिष्यति। अस्यां यात्रायां जैसलमेर-स्थात्रात् दिल्ली-पर्यन्तं रूनिचा-एक्सप्रेस् मारवाड़-जंक्शन-स्थात्रात् खांबली-घाट-पर्यन्तं धरोहर-रेलयानं सम्मिलिते स्तः। धरोहर-रेलयानेन पर्यटनाय प्रोत्साहनं प्राप्स्यते क्षेत्रे जीविकायाः नवीनावसराः च सर्जिष्यन्ते। एताम् परियोजनाम् अतिरिच्य प्रधानमन्त्री अन्ये द्वे रेलपरियोजने राष्ट्राय समर्पयिष्यति। एतयोः पञ्चाशदुत्तर-एकशत-किलोमीटर-मितस्य देगाना-'राई-का-बाग'-रेल-विस्तारं, अष्टपञ्चाशत्-किलोमीटर-मितस्य देगाना-कुचामन-सिटी-रेल-विस्तारं इत्यनयोः द्विधाकरण-परियोजने सम्मिलिते स्तः । प्रधानमन्त्री नरेन्द्र-मोदी अद्य मध्य-प्रदेशस्य यात्रां विधास्यति। सः राज्ये षट्-शताधिक-द्वसहस्र-कोटि-रूप्यकाणां परियोजनानाम् उद्घाटनं लोकार्पणं च करिष्यति। एताः परियोजनाः मार्ग-रेल-वात्येन्धन-नलिकावास-स्वच्छ-पेयजल-सम्बद्धाः वर्तन्ते। श्रीमोदी इंदौरनगरे लाइट-हाउस-परियोजनायाः उद्घाटनं करिष्यति। अस्याः निर्माणं प्रधानमंत्री-आवास-योजना-शहरी इत्यस्या: अन्तर्गतं अष्टाविंशत्यधिकैक-शत-कोटि-रूप्यकाणां व्ययेन सञ्जातमस्ति। अस्याः अन्तर्गतं एकसहस्रतः अधिकाः परिवाराः लाभान्विताः भविष्यन्ति । प्रधानमन्त्री अष्ट-चत्वारिंशद्-अर्बुद-रूप्यकाणां विभिन्न-मार्ग-परियोजनानाम् उद्घाटनं लोकार्पणं च करिष्यति, येन मध्यप्रदेशे मार्ग-संरचनायाम् उन्नतिः भविष्यति ।

**ऋतु-विज्ञान- विभाग:**

ऋतु- विज्ञान-विभागेन आगामि दिवस-द्वयार्थं बिहार-झारखण्ड-पश्चिमबंग-सिक्कम-उत्तरीयौ-डिशासु अतिवृष्टे: अनुमान: कृत:। ऋतु-विभागेन सूचितं यत् देशस्य पूर्वोत्तरीयभागेषु दिनत्रयं यावत् अतिवृष्टि: भविष्यति।

**सिक्किम:/साहाय्योद्धारकार्यम्**

सिक्किमे तीस्ता-नद्यां जलाप्लावात् अधुनावधि ऊनषष्टि: जना: लुप्ता:, पञ्च जनाश्च मृत्युमुपगता: सूच्यन्ते। तत्र साहाय्योद्धारकार्याणि सजवं प्रवर्तन्ते।

**क्रिकेट्**

पुरुषाणाम् आई.सी.सी.-विश्व-चषक-क्रिकेट्-स्पर्धा-मालिका अद्यप्रभृति अहमदाबादे नरेन्द्र-मोदि-क्रीडाङ्गणे समारभते। तत्र अभूतपूर्व-सुरक्षा-व्यवस्था प्रकल्पितास्ति।

**एशिया-क्रीडास्पर्धा**

चीनस्य हांगचोओ इत्यत्र नवदश-एशिया-क्रीडास्पर्धासु भारतेन अधुनावधि एकाशीति: पदकानि जितानि। ह्य: भारतेन त्रीणि स्वर्णपदकानि, पञ्च राजतानि, चत्वारि च कांस्यानि पदकानि जितानि। भारतं पदक-तालिकायां सम्प्रति चतुर्थं स्थानं भजते।

**।। इति वार्ता: ।।**